International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(2): 52-56
© 2018 IJSR
www.anantaajournal.com
Received: 19-01-2018
Accepted: 21-02-2018

डा. सुशान्तकुमारराजः
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः पुरी, उडीसा,
भारत

Correspondence
डा. सुशान्तकुमारराजः
सहाचार्यः, साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्,
श्रीसदाशिवपरिसरः पुरी, उडीसा,
भारत

# साहित्यशास्त्रस्योपादेयत्वसमीक्षणम्

**डा. सुशान्तकुमारराजः**

**प्रस्तावना**

विदितचरमिदं यत् जागतिकसकलवस्तूनि सत्वरजस्तमगुणात्मकान्येव । तेषां सर्वेषां समन्वयेन संसारोऽयं सफलतया संस्त्रियते, सुखदःखयोरनुभूतिः प्रतिपद्यते च। सर्वेऽपि प्राणिनः आध्यात्मिकादित्रितापैः सन्तापितास्सन्तः तद्विमुक्तये सर्वदा आनन्दाभिलसन्मार्गं कामयन्ते। विवेकप्राचुर्यात् प्राणिश्रेष्ठोऽयम्मानवः प्राण्यन्तरसाधारण्येन सच्चिदानन्दमयस्य परमेश्वरस्यांशभूतोऽपि अविद्याऽपरपर्यायेणाज्ञानेनावृतत्वादात्मानं सम्यग्तया न परिचिनोति। सांख्यदर्शनानुसारं सर्वोऽपि जनः सुखदुःखमोहसन्निभजीवनं यापयति। तथापि सर्वेषां मनुष्याणां मनसि इयमेकैवाभीप्सा वर्तते यत् सुखं मे स्यात् दुःखं मे न स्यादिति। तस्य च सुखापरपर्यायस्यानन्दस्य प्राप्तये जना नैकविधानि साधनानि समवलम्बन्ते । सामान्यतः कदाचित् नृत्यगीतादीनि, कदाचिदुत्तमभोजनपानावस्थानविहारादीनि, कदाचिच्च स्रक्चन्दनवनिताविलासादीनि साधनानि अवलम्बितानि सन्ति। परन्तु संसारादुपलभ्यमानानन्दः सततमचिरस्थायीति सर्वैरवगम्यते। यतः संसारः सर्वदा परिवर्तनशीलत्वात् स्वयमपि नितरां नश्वरः इत्यत्र नास्ति कोऽपि संशयः। तस्मात् सांसारिकपदार्थाः विनाशशीलत्वादविद्याऽपरपर्यायस्याज्ञानस्य निवृत्तये धीमानुत्तममानवः नानाविधानि शास्त्राणि परिशीलयति। आज्ञानान्निवृत्तिपूर्वकं ज्ञानप्राप्तये संस्कृतवाङ्मये नैकविधानि शास्त्राणि समुपलक्ष्यन्ते। तानि सर्वाण्यपि पाम्परिकरूपेणाङ्गीकृतानि शास्त्राणि बहुसंख्यकानि सन्ति। प्रसङ्गेऽस्मिन् प्रमूखविद्यानां प्रधानशास्त्ररूपेणाङ्गीकृते तासां चाष्टादशत्वात् सामान्यतः प्रमुखशास्त्राण्यपि अष्टादशसंख्यकानीति प्रथितानि सन्ति । ताश्चाष्टादशविद्या विष्णुपुराणे आचार्यव्यासदेवेन निम्नोक्तप्रकारेणोपस्थापितास्सन्ति, यथा-

> अङ्गानि वेदचत्वारो मीमांसा न्यायविस्तरः।
> धर्मशास्त्रं पुराणं च विद्याह्येता चतुर्दशः।। इति ।
> आयुर्वेदः धनुर्वेदः गान्धर्वश्चेति ते त्रयः ।
> अर्थशास्त्रं चतुर्थञ्च विद्या अष्टादशैव तत्।।[१] इति च।

एतासां विद्यानामथवा सर्वेषां शास्त्राणां समष्टिरूपं शास्त्रं काव्यशास्त्रं साहित्यशास्त्रं वेति मन्तव्यम्। दःखनिवृत्तिपूर्वकं सुखप्राप्तये शास्त्रीयमार्गोऽतीवाभिप्रेतो वर्तते । परन्तु तत्तच्छास्त्रानुसन्धानबलेन सर्वेऽपि जनाः परमानन्दप्राप्तुं विफला भवन्ति अतः क्रमेण सुखादल्पश्रमेण च निरन्तरानन्दप्राप्तये साहित्यमार्गोऽथवा काव्यमार्गोऽपि समुचिततया अन्वेष्टव्यो जायते, यत्र प्रविश्य सहृदयः सुखी सन् सच्चिदानन्दस्वरूपमनुभवति। तदुक्तं च कविराजविश्वनाथेन स्वकीये साहित्यदर्पणे-

> चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
> काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।। (सा.द. १.२)

काव्यरचनापठनाद्युपायबलेन न केवलं परिणतबुद्धिसम्पन्नानां जनानाम् अपितु अल्पबुद्धिगतसहृदयानां च अनायासादेव अलौकिकानन्दप्राप्तिर्भवतीति शास्त्रप्रमाणम् ।

**साहित्यपदार्थविवेचनम्-**

साहित्यम् इति एक: सार्वजनीन: शब्द:, यस्य प्रयोग: कस्यचिदेकस्य देशस्य भाषानिबद्धमौलिकरचनावलीनां कृते कृतो दृश्यते । भारतवर्षस्य सुप्रसिद्धविद्याव्यसनी भर्तृहरिस्तु संगीतसाहित्यकलाविहीनं जनं पशुत्वेन मनुते। यथोक्तम्-

संगीतसाहित्यकलाविहीन: साक्षात्पशु: पुच्छविषाणहीन: ।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम् ।।[३] इति ।
साहित्ये सुकुमारवस्तूनि दृढन्यायगहग्रन्थिले
तर्के वा मयि संविधातरि समं लीलायते भारती।
शय्या वास्तु मृदूत्तरच्छदवति दर्भाङ्कुरैरास्तृता
भूमिर्वा हृदयङ्गमो यदि पतिस्तुल्या रतिर्योषिताम् ।।[४]

इति वदता महाकवे: श्रीहर्षस्य मतानुसारेण साहित्ये सर्वाण्यपि सुकुमारवस्तूनि निवेशितानि सन्ति। एवमेव आन्विक्षिकी-त्रयी-वार्त्ता-दण्डनीतिश्चेति चतस्र: विद्या: प्रसिद्धा: सन्ति। आचार्यराजशेखरस्य मतेन साहित्यमपि पञ्चमी विद्यारूपेणैवाङ्गीकृता। यथोक्तं काव्यमीमांसायाम्- पञ्चमी साहित्यविद्येति यायावरीय:[५] इति। पुनश्च केचन साहित्यं पञ्चमवेदरूपेणापि स्वीकुर्वन्ति। यथोक्तं संस्कृतसाहित्येतिहासे आचार्यलोकमणिदाहालमहोदयेन- उपकारकत्वात् अलङ्कार: सप्तमामङ्गम्[६]इति। साहित्यान्तर्गतं नाट्यशास्त्रं तु पञ्चमवेदरूपेण स्वयं ब्रह्मणा एव प्रतिज्ञातम् । यथोक्तं नाट्यशास्त्रे-

क. नाट्यवेद: कथं ब्रह्मन्नुत्पन्न: कस्य वा कृते[७] इति तथा-

ख. प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति[८] इति। तथा च

ग. श्रूयतां नाट्यवेदस्य सम्भवो ब्रह्मनिर्मित:[९] इत्यादि।

एतेन साहित्यस्य परमोपादेयता प्रमाणिताऽस्ति। सहृदयहृदयाह्लादिशब्दार्थमयत्वेन[१०] सामान्यतया व्यष्टिरूपेण यत् काव्यमिति व्यवह्रियते, तेषामेव काव्यानां समष्टि: साहित्यत्वेनावबोध्यते।

सहितयोर्भाव: साहित्यमिति साहत्यशब्दस्यास्य व्युत्पत्तिमुररीकृत्य भारतीयकाव्यशास्त्रविदा वैयाकरणा मीमांसकाश्च साहित्ये शब्दार्थयो: समप्राधान्यमङ्गीकुर्वन्ति । एतेषां मतानुसारं साहित्ये शब्दार्थयो: पारस्परिक: सम्बन्ध: शाश्वतिकोऽस्ति। मीमांसाशास्त्रानुसारं शब्दस्य अर्थेन सह पारस्परिकोऽयं विशिष्टसम्बन्धो नित्यसम्बन्धोऽस्ति। यथोक्तम्- नित्य: सब्दार्थसंसर्ग:[११] इति। अत: न तु केवलं शब्देन नापि केवलमर्थेन साहित्यं भवितुमर्हति, अपि तु शास्त्रान्तराणि वत् उभयोरेव साहित्यमिति साहित्यपदेन व्यपदिश्यते । भामहानन्दवर्धनमम्मटभट्टप्रमुखा[१२]आचार्या अपि व्यष्टिभूतस्य काव्यस्य लक्षणघटकतया शब्दार्थयो: अनिर्वार्यत्वं समप्राधान्यं च स्वीकुर्वन्ति।

आचार्यराजशेखरस्य मतानुसारमपि व्यष्टिभूतस्य काव्यस्य लक्षणघटकतया तयो: शब्दार्थयो: सहभागेन या विद्या भवति, तन्नाम साहित्यम्। यथा- शब्दार्थयो: यथा वत् सहभावेन विद्या साहित्यविद्या[१३] इति । पुनश्च सा पुराणन्यायमीमांसाधर्मशास्त्राख्यानां चतसृणामपि विद्यानां निष्यन्दभूतेति कथ्यते। यथोक्तं राजशेखरेण- सा हि चतसृणामपि विद्यानां निष्यन्द:[१४] इति।

गुणवचनब्राह्मणादिभ्य: कर्मणि च[१५] इति पाणिनिसूत्रानुसारं सहितशब्दात् ष्यञ् प्रत्ययेन साहित्य इति पदस्य सिद्धिर्जायतते। अतोऽनया साहित्यपदस्य व्युत्पत्तिर्यथा- हितेन सह वर्त्तमानौ सहितौ तयोर्भाव: साहित्यम् इति । अनया व्युत्पत्या रामादिवत् प्रवर्तितव्यं न रावणादिवत् तथा कान्तासम्मिततयोपदेशयुजे इत्यादि हितोपदेशात्मको वाक्यार्थो बोध्यते। शब्दकल्पद्रूमानुसारं तु मनुष्यकृत: श्लोकमयग्रन्थविशेष: साहित्यपदेन बुध्यते[१७]।

एवं च बहुविधव्युत्पत्त्या यद्यपि साहित्यपदस्य बहुविधोऽर्थ: सम्भवति, तथापि सम्प्रति साहित्यमिति पदं पङ्कजादिवत् योगरूढत्वात् काव्यात्मकलेखमात्रमेवावबोध्यते। तथा हि चतुर्विधा हि शब्दा:- १ कवलयौगिक: २ केवलरूढ: ३ योगरूढ: ४ यौगिकरूढश्चेति भेदात् । तत्र -

१. यत्र व्याकरणादिप्रतिपादितप्रकृतिप्रत्यययायोगेन य: शब्दो निष्पद्यते, तादृशप्रकृतिप्रत्यययोगानुसारेण च तस्य शब्दस्य अर्थ: गृह्यते । स शब्द: केवलयौगिक: इत्युच्यते। यथा- पचतीति विग्रहेण पच् धातो: ण्वुल् प्रत्ययेन पाचकशब्द: निष्पद्यते। पाककर्त्तृरूपश्चार्थ: तस्य निर्णीयते।
२. यस्य तु शब्दस्य शास्त्रकल्पित: अवयवार्थ: न प्रतीयते, केवलं निर्दिष्टे कस्मिंश्चत् अर्थे तस्य शब्दस्य प्रयोगो भवति । स शब्द: केवलरूढ: इत्यङ्गीक्रियते।यथा- मणि-नुपुरादिशब्दा:।
३. यस्य तु शब्दस्य कृते व्याकरणादि शास्त्रस्य प्रतृतिप्रत्यययोगकल्पना दृश्यते, अथच योगार्थस्य सार्वत्रिकत्वव्यतिरेकेण निर्दिष्टैकस्मिन्नेव पदर्थे तस्य शब्दस्य रूढि: परिलक्ष्यते, स शब्द: योगरूढ: इति उच्यते। यथा पङ्कजशब्दस्य पङ्कोपपदात् जन् धातो ड प्रत्ययेन निष्पन्नोऽपि पङ्कजातानां शङ्ख-किचुलुकादीनाम् अर्थानां पङ्कजशब्दात् बोध: न जायते। तद्व्यतिरेकेण पङ्कजातस्य केवलस्य पद्मस्य एव बोध: सम्पद्यते। तस्मात् पङ्कजशब्द: योगरूढ: इति स्वीक्रियते।
४. यस्य तु शब्दस्य योगार्थोऽपि सम्भवति, अथ च योगार्थमनपेक्ष्य अर्थान्तरे तस्य शब्दस्य प्रयोग: क्रियते, स शब्द: यौगिकरूढ: इत्युच्यते। यथा - मण्डप: इति शब्द: । अत्र हि मण्डं पिवतीति वग्रहानुसारेण मण्डोपपदात् पा धातो: क प्रत्यये यद्यपि पण्डप: इति शब्द: निष्पद्यते, तथापि मण्डपानकारिरूपं योगार्थमनपेक्ष्य उपवेशनोपयोगिखानविशेषरूपे अन्येस्मिन् अर्थे तस्य प्रयोग: क्रियत् । अत: मण्डप: शब्द: यौगिकरूढ: इति मन्तव्यम्।

आचार्यसीतारामचतुर्वेदिमतानुसारं साहित्ये सर्वेषामपि तत्त्वानां समाहारो वर्तते। यत्र हृद्यकाव्यकौशलान्वित: प्रत्यक्षकल्पितविश्वस्य सकला विद्या: सृष्टिर्वर्णिता दृश्यते, तदेव साहित्यम्[१७]। भरतमुने: वचनानुसारमपि नाट्यशास्त्रसाहित्ये सर्वेषां शास्त्राणां, सर्वेषां शिल्पविद्यानां, सकलकलादीनाञ्च समावेशो भवति। यथा-

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।
नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते[१८] इति।

काव्यालङ्कारे आचार्यभामहोऽपि उद्घोषयति यत् महाकवे: काव्ये अङ्गतया शब्दार्थन्यायकलादीनां सर्वेषामपि समावेशो वर्त्तते । यथोक्तम्-

न स शब्दो न तद्वाच्यं न स न्यायो न सा कला ।
जायते यन्न काव्याङ्गमहो भारो महान्कवे:[१९] ।। इति ।

अत: साहित्यस्य प्रतिपाद्यविषय: अतीव महानस्ति। तेषां च प्रतिपाद्यविषयाणाम् अनुशासनं येन शास्त्रेण क्रियते तत्तु साहित्यशास्त्रमित्यवबोध्यते। केचन काव्यमेव साहित्यतया स्वीकुर्वन्ति।

एतत्तु शिष्टव्यवहाराद् विरुद्धत्वमेव प्रतीतिर्भवति। यत: रघुवंशकाव्यम्, कुमारसम्भवकाव्यम्, मेघदूतं काव्यं कालिदाससाहित्यं, शिशुपालबधकाव्यम्, किरातार्जुनीयं काव्यमिति उच्यते। एतेषां समाहारेणापि संस्कृतसाहित्यमिति

व्यवहारो दृश्यते। कालिदाससाहित्यवत् माघसाहित्यं भारविसाहित्यं वेति व्यवहारो नैव दृश्यते। अतः अस्माकं गुरुपादानां मतानुसारं साहित्यपदस्य ईदृशी व्युत्पत्तिर्भवितुमर्हति यत्- सहितानां काव्यानां परं भावः साहित्यम् इति । तस्मात् काव्यसमष्टिरेव साहित्यपदेन उच्यते, न तु व्यष्टिभूतं काव्यं महाकाव्यं वा । एवं प्रकारेण उत्कलसाहित्यं हिन्दीसाहित्यं उर्दूसाहित्यं बांग्लासाहित्यमित्यादि व्यवहारो दृश्यते ।

सूक्ष्मेक्षिकया सम्पूर्णवाङ्मयं पर्यालोचयामश्चेत्, साहित्यपदेन न केवलानां काव्यानामेव समाहारः संगच्छते, अपि तु तत्र तदङ्गानामपि समावेशः सम्प्राप्यते । काव्याङ्गतया अनुशासनात्मकानि अलङ्कारशास्त्राणि अपराणि सर्वाण्यपि शास्त्राणि गृह्यन्ते। तेषु अलङ्कारशास्त्रं भवति तस्य अन्तरङ्गम्। वहिरङ्गत्वेन सर्वाणि शास्त्रान्तराणि जायन्ते। अन्तरङ्गात्मकशास्त्रेण लक्ष्यात्मकं केवलं काव्यमात्रं पुष्टं भवति । परन्तु वहिरङ्गात्मकेषु शास्त्रेषु लक्ष्यात्मकं लक्षणात्मकं साहित्यं च पुष्टिमश्नुते। तत्र शास्त्रान्तरैः लक्षणात्मकसाहित्यस्य शोभा कथं वर्धते तदप्यग्रे आलोचयिष्यते। पुनश्च अङ्गाङ्गीनः अभेदारोपनियमात् सर्वे लक्षणग्रन्थास्तु साहित्यपदेन व्यवहारे न कापि विप्रतिपत्तिर्जायते।

अतः अनया पर्यालोचनया निष्कर्षोऽयं सम्पद्यते यत्, साहित्यपदेन काव्यनाट्यादिसमष्टिभिः सह तदङ्गानामपि ग्रहणं भवितुमर्हति। तस्मात् साहित्यस्य स्वरूपाधायिका व्युत्पत्तिर्यथा- सहितानां काव्यानां तदङ्गानां च समष्टिः साहित्यमिति निष्कर्षः।

**साहित्यस्य शास्त्रत्वसमीक्षा-**

साहित्यस्य काव्यस्य वा तत्त्वप्रतिपादकं शास्त्रं साहित्यशास्त्रं काव्यशास्त्रं वेति विदितचरमेव। परन्तु केषाञ्चिद्विदूषामत्र विचिकित्सा जायते यत्- कथं साहित्यस्य शास्त्रत्वेन ग्रहणम् ? यतः-

सामान्यतः शास्त्रपदेन विद्या इति उच्यते । सैव विद्या संख्यया चतुर्दशः इति च ज्ञायते। यथोक्तं विष्णुपुराणे–

> अङ्गानि वेदचत्वारो मीमांसा न्यायविस्तरः।
> धर्मशास्त्रं पुराणं च विद्याह्येता चतुर्दशः।। इति ।

अथवा चतुर्दशविद्याभिः सह आयुर्वेद-धनुर्वेद-गान्धर्ववेदार्थशास्त्राणां च संयोगाद् अष्टादशविद्यैव प्रसिद्धा सन्तीति उच्यते। यथा-

> आयुर्वेदः धनुर्वेदः गान्धर्वश्चेति ते त्रयः ।
> अर्थशास्त्रं चतुर्थञ्च विद्या अष्टादशैव तत्।। इति ।

एतासु अष्टादशविद्यासु साहित्यस्य चर्चापि न दृश्यते नैव श्रूयते वा।

अस्याः समस्यायाः समाधानमपि एवं भवितुमर्हति यथा- एता अष्टादशविद्या एवाष्टादशशास्त्राणीति कथनं नैव यथायथं गाहते। यतः अष्टादशविद्यात्वेन परिगणितानि निर्दिष्टशास्त्राणि विहाय शिल्पशास्त्रं, पाकशास्त्रं, अश्वशास्त्रं, गजशास्त्रं, तुरगशास्त्रमित्यादीनामपि शास्त्रत्वेन प्रयोगः बहुषु स्थलेषु दरीदृश्यते। साहित्यं तु अष्टादशसु विद्यासु अपरिगणयन्नपि पूर्वनयेन तस्य शास्त्रत्वसिद्धिः भवितुमर्हति एव। अपि च विद्यते तत्त्वमनयेति विद्यायाः व्युत्पत्तिः इति अनया कलानामपि विद्यात्वेनापि व्यपदेशो भवेत्, यासां तु शास्त्रत्वमेव न कदाप्यङ्गीकर्तुं शक्यते। अतोऽस्मद्गुरुपादानाम्मतानुसारं सर्वाणि शास्त्राणि विद्यान्तर्भावितानि भवन्ति, परन्तु सर्वा एव विद्याः शास्त्रत्वेन नैव व्यवह्रीयन्ते[२०] इति। राजशेखरप्रमुखा प्रामाणिकाचार्याः तु साहित्यशास्त्रमपि विद्यात्वेन व्यवहरन्ति । यथोक्तम् काव्यमीमांसायाम्- पञ्चमी साहित्यविद्येति यायावरीयम्[२१] इति । पुनश्च विद्या वक्रगिरा[२२] इति वदता लोकमणिदाहालमहोदयेन साहित्यशास्त्रमपि पञ्चमवेदत्वेनापि स्वकीये संस्कृतसाहित्येतिहासे ग्रन्थे समर्थितम्। अतः साहित्यस्य शास्त्रत्वाभावजनितसमस्येयं भ्रमविजृम्भिता इति मन्तव्याः।

इदानीमेवात्र विचारस्य प्रसङ्गो यत्-

किं नाम शास्त्रमथवा शास्त्रस्य लक्षणं किमस्ति ? येन साहित्यस्य शास्त्रत्वविचारः स्यात्। उच्यते-

शासनात्शास्त्रम् अथवा संसनात्शास्त्रमिति सर्वविदितमस्ति। अतः शासु अनुशिष्टौ[२३] इति धातोः शास्त्रपदं सिद्ध्यति । एतेन अनुशासनप्रधानाया विद्याया एव शास्त्रत्वं जायते न तु सर्वासाम् इति।

पुनश्चेयं शङ्का जायते यत् कवृवर्णेति धातोः तदर्थानुसारं च वर्णनाप्रधानं भवति काव्यं न तु अनुशासनप्रधानमेव। अतः वर्णनाप्रधानात्मकानां काव्यानां समष्टौ यत् साहित्यं जायते, तत् कथं शास्त्रपदभाक् भवितुमर्हति ? यतः अनुशासनप्रधानं शास्त्रं वर्णनाप्रधानं च काव्यमिति अनयोः वैपरीत्यमेवानुभूयते। पुनश्च वाग्देवतावतारमम्मटाचार्योऽपि काव्यकारणनिरूपणप्रसङ्गे शास्त्रात् काव्यस्य भिन्नत्वं प्रत्यपादयत्, यथा-

> शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
> काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे ।।[२४] इति ।

एतद्विषये रसनिष्पत्तितत्त्वालोके साहित्यस्य शास्त्रत्वविचारप्रसङ्गेऽस्मद्गुरुचरणाः इत्थं लिखन्ति यथा- परं काव्यविषयिणी साहित्यविषयिणी वा अनुशासनप्रधानविद्या काव्यशास्त्रपदेन साहित्यशास्त्रपदेन वा व्यपदेशसौलभ्यं भजते । इति का वा अनुपपत्तिः ? इति।

अत एव शब्दानुशासनप्रधानत्वात् व्याकरणं शास्त्रत्वेनाङ्गीक्रियते। यथा- वाक्यानुशासनप्रधानत्वात् मीमांसाविद्या मीमांसाशास्त्रपदवाच्यम्, एवं च पदार्थानुशासनप्रधानत्वान्न्यायदर्शनमपि शास्त्रत्वेनाङ्गीक्रियते। ब्रह्मजीज्ञासानुशासनप्रधानं शास्त्रं वेदान्तशास्त्रमित्यादि व्यवहारा अपि समवलोक्यन्ते। तथैव काव्यस्य साहित्यस्य वा अनुशासनप्रधानत्वाल्लक्षणग्रन्था अपि काव्यशास्त्रं साहित्यशास्त्रं वेति व्यवह्रियन्ते । काव्यप्रकाशकारोऽपि काव्यशास्त्राद्यवेक्षणादिति उक्त्वा शास्त्रपदेन अलङ्कारशास्त्रादीनामनुशासनप्रधानत्वं स्वीकरोति। एवं च शास्त्रात् काव्यमपि पृथक्त्वेन प्रकाशमकरोत्। अतः साहित्यशास्त्रमित्युक्ते केवलानां लक्षणग्रन्थानामेव ग्रहणं जायते, न तु लक्ष्यग्रन्थानामपि। आचार्यभरतमुनिरपि नाट्यशास्त्रं प्रवक्ष्यामीत्युक्त्वा दृश्यकाव्यानुशासनात्मकं शास्त्रं नाट्यशास्त्रत्वेन निर्दिशति। यथोक्तम्-

> प्रणम्य शिरसा देवौ पितामहमहेश्वरौ ।
> नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् [२५]।। इति।

रसनिष्पत्तितत्त्वालोके अप्येका युक्तिः विद्यते यथा- साहित्यतत्त्वनिरूपणप्रवृत्तानां विद्यानामनुशासनप्रधानत्वात् शास्त्रत्वं तावत् सिद्धम्, तासां च विद्यानां साहित्याङ्गत्वेन न कस्यचिद्विमतिरुदेत्[२६] इति । अत्रेदं चिन्तनीयं यत् अङ्गाङ्गिनोऽभेदत्वादङ्गभूतविद्यानामपि साहित्यपदेन व्यपदेशो भवितुमर्हति । अतः काव्यालङ्कार-काव्यप्रकाश-ध्वन्यालोक-साहित्यदर्पणप्रमुखाणामनुशासनप्रधानानां ग्रन्थानां तु साहित्यत्वं शास्त्रत्वं च सिध्यति। नानाशास्त्रविशारददार्शनिकशिरोमण्याचार्याभिनवगुप्तः स्वकीयध्वन्यालोकलोचनटीकायाम् आनन्दवर्धनस्य ध्वन्यालोकग्रन्थं शास्त्रपदेन साक्षादेव निर्दिशति, यथा- तेन स आनन्दवर्धनाचार्यः एतच्छास्त्रद्वारेणेत्यादि[२७]। तदेव साहित्यस्य शास्त्रम् साहित्यरूपं च शास्त्रमिति द्विधा सिद्धं साहित्यशास्त्रम् इति।

मीमांसको मुकुलभट्टोऽपि साहित्यस्य शास्त्रत्वं दृढतया स्वीकरोति। तच्चोक्तं स्वकीयाविधावृत्तिमातृकायां यथा- व्याकरण-मीमांसा-तर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषु उपयोगादिति[२८]। आचार्यकुन्तकेनापि प्रतिपादितं यत्- शब्दार्थसहभावात्मके साहित्ये रीति-गुणालङ्कारवक्रोक्ति-वृत्ति-रसादीनामन्तर्भावो भवति[२९]। साहित्यशास्त्राभ्यन्तरे एतेषां सर्वेषामपि विवेचनं दृश्यते। यत: ईदृशानां तत्त्वानमप्यनुशासनमेव अलङ्कारशास्त्रं भवति। अत: अलङ्कारशास्त्रमेव साहित्यशास्त्रमित्यत्र नास्ति संशयस्यावसर:।

प्रागुक्तपर्यालोचनया अयमेव निष्कर्षो जायते यत्, शास्त्रान्तरवदनुशासनप्रधानत्वात् साहित्यान्तर्गता: अङ्गभूता लक्षणग्रन्थाश्च शास्त्रपदवाच्या भवन्ति एव। साहित्यदर्पण: काव्यप्रकाश: ध्वन्यालोक: साहित्यानुशासनादय: साहित्यशास्त्रीयग्रन्थत्वेन परिगणिता: सन्ति, न तु साहित्यशास्त्रम्। अत: बलदेवोपाध्याय: जगदीशचन्द्रमिश्र: लोकमणिदाहाल: पी.भी.काणेप्रभृतय: समालोचका अपि नानाविधाभि: युक्तिभि: साहित्यं शास्त्रत्वेन प्रत्यपादयन्।

साहित्यशास्त्रं भवति अङ्गभूतम् । काव्यसमष्ट्यात्मकं साहत्यं भवति अङ्गीरूपम्। लक्षणात्मकस्य साहित्यस्य शास्त्रत्वं सिद्धत्वादङ्गाङ्गिनोऽभेदारोपादङ्गीभूतस्य साहित्यस्यापि शास्त्रत्वमिति मन्तव्यम्। अत: साहित्यशास्त्रमित्युक्तौ लक्षणसाहित्यमिति सामान्यतयावबोध्यते। इति ।

**साहित्यशास्त्रस्य नामानि**

साहित्याचार्या: समालोचकाश्च शास्त्रस्यास्य बहूनि पारिभाषिकनामानि व्यवहरन्ति। अस्य द्वितीयं नाम भवति काव्यशास्त्रमिति विदितचरमेव। साहित्यशास्त्रे ये ये मूर्धन्यभूता ग्रन्था विद्यन्ते, तेऽपि काव्यालङ्कार: काव्यादर्श: काव्यालङ्कारसूत्रवृत्ति: काव्यप्रकाश: इत्यादिनामभि: ख्याता: सन्ति। काव्यानामपिशासनात्मकं शास्त्रं भवति काव्यशास्त्रमिति विदितोऽर्थ:।

साहित्यशास्त्रस्य तृतीयं नाम अलङ्कारशास्त्रमिति भामहादिप्राचीनकाव्यलक्षणकारा: काव्ये अलङ्कारस्य प्राधान्यं स्वीकृतवन्त:। प्राधान्येन व्यपदेशा भवन्तीति न्यायेन रस-ध्वनि-गुण-रीति-वृत्यादिप्रतिपादनविशिष्टस्यापि शास्त्रस्य अलङ्कारशास्त्रत्वमिति व्यपदेश: प्रवृत्त:।

वस्तुतस्तु अलंक्रियतेऽनेनेति व्युत्पत्त्या अलङ्कारो नाम उपमदि काव्यशोभाधायकालङ्कारा गृह्यन्ते। परन्तु अलङ्करणमलङ्कार इति भावव्युत्पत्त्या तु अलङ्कारो नाम शोभा सौन्दर्यं वेति वोध्यते। अत एव साहित्यशास्त्रस्य चतुर्थनामान्तरं सौन्दर्यशास्त्रमित्यपि वर्तते। यै: तत्त्वै: काव्यस्य शोभावर्धनं जायते तेषां तत्त्वानां प्रतिपादकं शास्त्रं सौन्दर्यशास्त्रमित्यपि कथ्यते। एवं च साहित्यशास्त्रं क्रियाकल्पसाहित्यं लक्षणसाहित्यमित्यादिबहुविधानि नामानि शास्त्रीयसमालोचकै: व्यवहृतानि सन्ति। अत: लोकमणिदाहाल: अपि स्वकीये संस्कृतसाहित्येतिहासे ग्रन्थे साहित्यशास्त्रीयनाम्ना षट्संख्यकानि नामानि गृह्णाति । तेषां युक्तियुक्ततामपि प्रतिपादितवान् ।

**साहित्यशास्त्रस्योपादेयता**

साहित्यतत्त्वप्रतिपादनात्मकं शास्त्रं साहित्यशास्त्रम्, सर्वेषां सहृदयानां कृते अतीवोपादेयं वर्तते। आनन्दवर्द्धनानुसारं सहृदयानां मनसि आनन्दलाभाय ध्वनितत्त्वात्मको ग्रन्थ: प्रकाशो जायते। यथोक्तं ध्वन्यालोके-

तस्य हि ध्वने: स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणियसिभिश्चि-रन्तनकाव्यलक्षणविधायिभिरनुन्मिलितपूर्वम् अथ च रामायणमहाभारतप्रभृतीनि लक्ष्यतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठमिति प्रकाश्यते[३०] इति। काव्यपरम्परायामपि साहित्यस्यालोचनं साक्षादमृतमिति प्रसिद्धिरस्ति। यथोच्यते अभियुक्तै:-

> संगीतमथ साहित्यं सरस्वत्या: स्तनद्वयम् ।
> एकमापातमधुरमन्यदालोचनामृतम् ।।[३१] इति।

वैदिकसाहित्येऽपि अनेके मन्त्रा: सन्ति, येषामर्थबोध: अलङ्कारज्ञानमन्तरा नैव सम्भवति। यथा-

> द्वा सुपर्णा सयुजा सखायां समानवृक्षं परिषस्व जाते।
> तयोरेक: पिप्पलं स्वादवत्ति अनश्ननन्यो ह्यभिचाकशशीति[३२]।। इति।

इत्यस्मिन् मन्त्रे अतिशयोक्त्यलङ्कारद्वारेणैव प्रतिपाद्यवस्तु बोध्यते । अत: यदि प्रथमत: अतिशयोक्ते: ज्ञानं न भवेत्तर्हि मन्त्रोऽयं हृद्गमो न प्राप्नोति। अस्यातिशयोक्यलङ्कारस्य ज्ञानं केवलम् अलङ्कारशास्त्राध्ययनेनैव सम्भवति। एवं च सुसारथरश्वानिव पन्मनुष्यान्नेनीयतेऽभिषुर्वाजिन: इत्यस्मिन् वैदिकमन्त्रेऽपि उपमालङ्कारो वर्तते, यस्य परिज्ञानं केवलम् अलङ्कारशास्त्रादेव सम्पद्यते। एवमन्यत्रापि वैदिकमन्त्रेषु अलङ्कारशास्त्रीयज्ञानस्यावश्यकता वर्तते इति विस्तरभिया नालोच्यते।

वैदिकसाहित्यं वल्लौकिकसाहित्येऽपि अलङ्कारादिसाहित्यशास्त्रीयज्ञानं कविताया: सुस्पष्टं भावबोधनाय निमित्तं भवति। काव्यं ग्राह्यम् अलङ्कारादिति वामनाचार्यस्य मतानुसारं काव्यानि अलङ्कारादेव गृहीतानि सन्ति अर्थादलङ्कारा एव काव्यत्वाङ्गीकारे कारणभूता: सम्पद्यन्ते । कामधेनुना अपि सूत्रस्यास्य व्याख्यानावसरे अभिहितं यत्, काव्यग्रहणहेतुत्वादलङ्कारग्रन्थमपि अलङ्कारशास्त्रत्वेन प्रकाश्यते।

वेदादिशास्त्रेषु विद्यमानानि विविधोपदेशसम्बलितानि तत्त्वानि सर्वजनबोधसुकराणि नैव सम्पद्यन्ते । तस्मात् लोकव्यवहार: अव्यवस्थित: आसीत्। अस्यामेवावस्थायां सार्ववर्णिकनाट्यशास्त्रस्य प्रयोजनमासीदिति विज्ञाय स्वयं ब्रह्मदेवेन साहित्यान्तर्गतस्य नाट्यशास्त्रस्य उत्पत्ति: कृता । यथोक्तम्-

> न वेदव्यवहारोऽयं संश्राव्य: शूद्रजातिषु।
> तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ।।[३३] इति ।

सार्ववर्णिकमिदं नाट्यशास्त्रं न केवलं नाट्यतत्त्वानां निर्णयमपितु सर्वेषां शास्त्रीयतत्त्वानां संबाहकरूपेण परिचितोऽस्ति। अत: शास्त्रमिदं सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकञ्चेति परिचीयते। तस्मात् सकलशास्त्रीयतत्त्वानि साहित्यशास्त्रे विद्यमानानि सन्ति । केवलं शास्त्रमिदमध्ययनेन शास्त्रान्तराणां सामान्यज्ञानं सम्पद्येत इति विचारेणास्य साहित्यशास्त्रस्य लोकप्रियता वर्तते आधुनिकसमाजे। अत: संस्कृतवाङ्मये साहित्यशास्त्रस्योपादेयता सर्वत्र समधिको वर्त्तते इत्यत्र नास्ति काऽपि विप्रतिपत्ति:।

**सन्दर्भा**


१. विष्णुपुराणम् ।
२. सा.द. १.२
१. नीतिशतकम्- श्लो-१२ ।
३. नैषधीयचरितम् ।
४. का.मी. -१.पृ-४.।
५. सं.सा.इतिहास:,लोकमणिदाहालकृत: पृ-१४८।
६. ना.शा.१.४ ।
७. ना.शा.१.६।
८. ना.शा.१.७ ।
९. ध्वन्या. १.१ वृत्ति:।
१०. मीमांसादर्शनम् पृ- ३५।
क) शब्दार्थौ सहितौ काव्यम् इति भामह:(काव्यालङ्कार:) ।
ख) काव्यशब्दोऽयं गुणालङ्कारोपस्कतयो: शब्दार्थयो: वर्त्तते। का.अ.सू.वृ. १.१।

ग) तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि इति मम्मटः। काव्यप्रकाशः-१.सू.१

घ) सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम् इति। ध्वन्या. १. पृ. १०।

११. काव्यमीमांसा।
१२. पा.सू. ५.१.८.२४।
१३. श.क.दृ- भा.५.पृ ३६६-।
१४. हृद्य-साधु -सकलविद्यादिसहितं कविकर्म साहित्यम् इति- साहित्यानुशासनम् १.२।
१५. ना.शा.- १.११७।
१६. काव्यालङ्कारः भामहः।
१७. रसानिष्पत्तितत्त्वालोकः पृ-७।
१८. का.मी. पृ.
१९. सं.सा.इति.लोकमणिदाहालःपृ-१४९।
२०. सि.कौ. क्रमाङ्कः-७२७।
२१. का.प्र.- १.३।
२२. ना.शा. १. १।
२३. र.नि.तत्त्व. पृ-८।
२४. ध्वन्या. पृ.५५।
२५. अ.वृ.मा.पृ. ११।
२६. वक्रोक्तिजीवितम् ।
२७. ध्वन्या.१.१ वृत्तिः।
२८. अभियुक्तोक्तिः ।
२९. सामवेदसंहिता, मु.उ. ३.१।
३०. ना.शा. १-१२ ।

**सहायकग्रन्थानुक्रमणिका**


| **ग्रन्थाः** | **ग्रन्थकाराः, प्रकाशनसंस्थाश्च।** |
|---|---|
| अग्निपुरणम्: | व्यासदेवः, नागप्रकाशनम् जवाहरनगरम्, दिल्ली- ७, १९८५। |
| अभिधावृत्तिमातृका | मुकुलभट्टः, निर्णयसागरप्रेस्, पुना ओरियण्टल वुक्एजेन्सी, १९३२। |
| अलङ्कारशास्त्रस्येतिहासः | जगदीशचन्द्रमिश्रः, चौखम्बाविद्याभवनम्, १९८३। |
| अष्टाध्यायी | पाणिनि,निर्णयसागरप्रेस्, मुम्बाई, १९५४। |
| उपनिषद्संग्रहः | मोतिलाल वनारसीदासः, प्रथमसंस्करणम्, १९७०। |
| काव्यादर्शः | दण्डी, प्रभाव्याख्यासहितः, पुना, १९३८। |
| काव्यप्रकाशः | मम्मटः, विश्वेश्वरप्रणीतः वाराणसी, १९६०। |
| काव्यप्रकाशः | मम्मटः, नागश्वरीटीका, चौखम्बा संस्कृत सीरीज, १९६९। |
| काव्यप्रकाशः | मम्मटः,झल्लकीकरटीका,भाण्डारकर ओरि.इन्स्टिट्युट,पुना-१९५०। |
| काव्यमीमांसा | राजशेखरः, प्रकाशटीका, वाराणसी, १९६४। |
| काव्यानुशासनम् | हेमचन्द्रः, निर्णयसागरप्रेस, मुम्बाई, १९३४। |
| काव्यालङ्कारः | भामहः, चौखम्बा संस्कृत सिरीज् वनारस, १९२८। |
| ध्वन्यालोकः | आनन्दवर्धनः, चौखम्बा विद्याभवनम् वाराणसी, १९२९। |
| नाट्यशास्त्रम् | भरतमुनिः, चौखम्बा संस्कृत सिरीज्, वाराणसी, १९२९। |
| नैषधीयचरितम् | श्रीहर्षः, चौखम्बा विद्याभवनम्, वाराणसी १९८५। |
| मीमांसादर्शनम् | जैमिनी शावरभाष्यसहितम्, पुना, १९२९। |
| रसगङ्गाधरः | पण्डितराजजगन्नाथः, चौखम्बा विद्याभवनम् वाराणसी १९५५। |
| रसनिष्पत्तितत्त्वालोकः | भागवतप्रसादत्रिपाठी श्रीसदाशिवकेन्दियविद्यापीठम्, पुरी-१९८३। |
| वक्रोक्तिजीवितम् | कुन्तकः,अनुसन्धानपरिषद्, दिल्ली- १९५५। |
| व्यक्तिविवेकः | महिमभट्ट, चौखम्बासंस्कृतसिरीज् वाराणसी १९३६। |
| व्याकरणमहाभाष्यम् | पतञ्जलिः,मोतिलालवनारसीदासः, दिल्ली १९६७। |
| शब्दकल्पद्रुमः | नागप्रकाशनम्,छात्रसंस्करणम्,दिलिल्ली। |
| साहित्यदर्पणः | विश्वनाथकविराजः, मोतिलालवनारसीदासः, १९७०। |
| साहित्यानुशासनम् | सीतारामचतुर्वेदी,चौखम्बासुरभारती प्रकाशनम् वाराणसी १९५८। |
| सिद्धान्तकौमुदी | भट्टोजिदीक्षितः,चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, १९७८। |